काव्यप्रकाशस्थानुमानखण्डनप्रसङ्गस्य कासुचिद् व्याख्यासु भ्रमः

रामकुमारशर्मा

काव्यप्रकाशे अनुमानखण्डनपूर्वकं व्यञ्जना समस्थापि। प्रकरणेऽस्मिन् महिमभट्टेन कृतं काव्यानुमानखण्डनं मम्मटेन खण्ड्यत इति क्वचिद् व्याख्यासु दृश्यते। वस्तुतः मम्मटेन व्यक्तिविवेककारस्य महिमभट्टस्य काव्यानुमानं न खण्ड्यते, तार्किकाणामेव अनुमानं खण्ड्यते। ध्वनिकृताऽपि तार्किकाणामेव अनुमानं खण्डयित्वा व्यञ्जना साधिता। तथैवात्रापि। व्यक्तिविवेककृतो मतं खण्ड्यत इति केषाञ्चिद् व्याख्यातृणां भ्रमं दर्शयति एषः लेखः।

काव्यप्रकाशस्य पञ्चमोल्लासे काव्येऽनुमानं खण्डितं व्यञ्जना स्थापिता च। एतत्प्रसङ्गस्थकाव्यप्रकाशग्रन्थव्याख्याने कासुचिद् व्याख्यासु भ्रम इति मन्ये। काश्चिद् व्याख्या अनुमानखण्डनप्रसङ्गं महिमभट्टेन योजयन्ति। आसां मते महिमभट्टेन व्यक्तिविवेके स्थापितं काव्यानुमानं मम्मटेन खण्ड्यते। वस्तुतो मम्मटेन व्यक्तिविवेकस्य काव्यानुमानं न खण्ड्यते, अपितु तार्किकाणामेवानुमानम्, यथा ध्वनिकृता काव्ये तार्किकाणाम् एवानुमानं निराकृतं व्यञ्जकत्वं साधितं च। अतो मम्मटेन व्यक्तिविवेककृतो मतं खण्ड्यत इति कासाञ्चन व्याख्यानां भ्रम एवेति निबन्धेऽस्मिन् विचार्यते। एतदर्थं विचारणीया विषया एवं विभज्यन्ते–

(क) अनुमानखण्डनग्रन्थः

(ख) तस्य मुख्या व्याख्याः

(ग) कासुचिद्व्याख्यासु भ्रमः।

एतत्सर्वं क्रमेण प्रदर्श्यते–

(क) अनुमानखण्डनग्रन्थः

मम्मटेन काव्यप्रकाशस्य पञ्चमोल्लासेऽनुमाने व्यञ्जनाया अन्तर्भावो निराकृतः। तन्मूलं वाच्यरूपस्य हेतोराभासमानता। अनुमानं त्रिरूपात् सत एव हेतोर्भवति, व्यक्तिस्त्वसतोऽपि हेतोः। ''भ्रम धार्मिक विश्वस्तः'' इत्यादौ व्यभिचरिताद् विरुद्धादसिद्धादपि भयकारणसिंहोपलब्धिरूपवाच्यहेतोर्भ्रमणनिषेधस्य व्यक्तिर्भवत्येव। अत एतादृशे स्थले तार्किकाणाम् अनुमानं न प्रभवति। अतो व्यञ्जना स्वीकार्येति मम्मटस्याभिप्रायः। काव्यप्रकाशेऽनुमानखण्डनप्रसङ्गस्य ग्रन्थ एवं विद्यते–

ननु वाच्यादसम्बद्धं तावन्न प्रतीयते यतः कुतश्चिद् यस्य कस्यचिदर्थस्य प्रतीतेः प्रसङ्गात्। एवं च सम्बन्धाद् व्यङ्ग्यव्यञ्जकभावोऽप्रतिबन्धे न भवतीति व्याप्तत्वेन नियतधर्मिनिष्ठत्वेन च त्रिरूपाल्लिङ्गाल्लिङ्गिज्ञानमनुमानं यत् तद्रूपः पर्यवस्यति।.....अत्रोच्यते– भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेणान्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः। शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि। गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः, अपितु वचनात्, न च वचनस्य प्रामाण्यमस्ति, अर्थेनाप्रतिबन्धादित्यसिद्धश्च। तत् कथमेवंविधाद्धेतोः साध्यसिद्धिः।[१]

(ख) तस्य मुख्या व्याख्याः

उक्तस्य मूलग्रन्थस्य मुख्या व्याख्या द्विधा लभ्यन्ते। काश्चिदुक्तं ग्रन्थं महिमभट्टस्वीकृत-काव्यानुमानखण्डनपरत्वेन व्याख्यान्ति, तदितरास्तु सामान्येनाऽनुमान-निराकरणपरतया। तत्र बालचित्तानुरञ्जिनी-साहित्यचूडामणि-सम्प्रदायप्रकाशिनी-काव्य-प्रदीप-सुधासागर-बालबोधिनीप्रभृतयो व्याख्याः स्पष्टम् उद्घोषयन्ति यदुक्तकाव्य-प्रकाशग्रन्थेन महिमभट्टस्यैवानुमानं सपूर्वपक्षविन्यासं खण्ड्यते।[२] अत्र मूलं काव्यप्रकाशे कथितानुमानप्रतिपादकग्रन्थस्य क्वचिदक्षरशः पूर्णरूपेणार्थतश्च व्याक्तिविवेकस्य **यदुक्तम्– त्रिरूपाल्लिङ्गाद्यदनुमेये ज्ञानं तदनुमानमिति। तच्चानुमानमेव। नह्यर्थादर्थान्तरप्रतीतिरनुमानमन्तरेणाऽर्थान्तरमुपपद्यते। .....यदाहुः- न चान्यदर्शनेऽन्यकल्पना युक्ताऽतिप्रसङ्गात्। तस्य नान्तरीयकतायां स्यात्।**[३] इत्यादिरूपाभिः,

पक्षधर्मत्वसम्बन्धव्याप्तिसिद्धिव्यपेक्षणात्।
वृक्षत्वाम्रत्वयोर्यद्वद् यद्वच्चानलधूमयोः।।
अनुमानत्वमेवात्र युक्तं तल्लक्षणान्वयात्।[४]

इत्यादिरूपाभिश्च पङ्क्तिभिः साम्यम्। अत एव बालबोधिन्यामुक्तम्– **एतावता ग्रन्थेन व्यक्तिविवेककारमतमनूद्य दूषयति।**[५] पण्डितराजोऽप्येवमेव मनुते। इदमस्य **लिङ्गजलिङ्गिज्ञानरूपाऽनुमानेन व्याप्तिं गतार्थयतो व्यक्तिविवेककृतो मतं प्रत्याचक्षणेन**[६] इति रसगङ्गाधरवाक्येन स्पष्टम्।

किन्तु सङ्केत-काव्यादर्श-विवेकदीपिका-दर्पणविस्तारिका-सारबोधिनीप्रभृतयो व्याख्याः काव्यप्रकाशस्थानुमानखण्डनप्रसङ्गग्रन्थमनामविशेषग्राहं तार्किकानुमानखण्डन-परत्वेन व्याख्यान्ति। एषामेव व्याख्यानं समुचितमिति मन्ये। पूर्वोक्तानि व्याख्यानानि भ्रान्तानीति प्रतीयते तत् कथमिति विचार्यते।

(ग) कासुचिद्व्याख्यासु भ्रमः

तत्र बालचित्तानुरञ्जिनीप्रभृतीनां भ्रमः। न हि मम्मटेन महिभट्टस्य काव्यानुमानं खण्ड्यते, महिमभट्टस्य काव्यानुमानस्यासत्यादपि हेतोर्जायमानत्वेन हेतोराभासमानत्वेन तत्खण्डनस्यानुचितत्वात्। यथा ध्वनिकृतो व्यञ्जना हेत्वाभासादपि भवति तथा महिम्नः काव्यानुमानमपि। ध्वनिकृतो वचनमुद्धरता महिम्ना स्वयमवादि- **''प्रतीति-परमार्थं च काव्यादि तावतैव विनेयेषु विधिनिषेधव्युत्पत्तिसिद्धेः। तदुक्तम्– भ्रान्तिरपि सम्बन्धतः प्रमेति। .....तेनात्र गम्यगमकयोः सत्यासत्यत्वविचारो निरुपयोग एव। काव्यविषये च वाच्यव्यङ्ग्यप्रतीतिनां सत्यासात्यत्वविचारो निरुपयोग एवेति तत्र प्रमाणान्तरपरीक्षोपहासायैव सम्पद्यत इति।**[७] एतेनेदं स्पष्टं यत् **काव्यविषये च वाच्यव्यङ्ग्यप्रतीतीनां सत्यासत्यत्वनिरूपणस्याप्रयोजकत्वम् एवेति तत्र प्रमाणान्तरपरीक्षोपहासायैव सम्पद्यते। तस्माल्लिङ्गिप्रतीतिरेव व्यङ्ग्यप्रतीतिरिति न शक्यते वाक्तुम्**[८] इति वदता ध्वनिकृता, **न हि तेषां वाक्यानाम् अग्निष्टोमादिवत्सत्यार्थप्रतिपादनद्वारेण प्रवर्तकत्वाय प्रामाण्यम-न्विष्यते, प्रतीतिमात्रपर्यवसायित्वात्। प्रीतेरेव चालौकिकचमत्काररूपाया व्युत्पत्त्यङ्गत्वात्।**[९] इति प्रतिपादयता लोचनकृता च व्यञ्जनास्थापने यः सिद्धान्त आश्रितः स एव महिम्ना काव्यानुमानस्य। महिम्ना काव्ये सैव सामग्री काव्यानुमाने स्वीकृता या ध्वनिवादिभिर्व्यञ्जकत्वे। तेनोक्तम्–

यार्थान्तराभिव्यक्तौ व : सामग्रीष्टा निबन्धनम्।
सैवानुमितिपक्षे नो गमकत्वेन सम्मता।
अन्यतोऽन्यस्य हि ज्ञानमनुमैकसमाश्रयम्।।"[१०]

महिम्नो व्यञ्जनाया अस्वीकारस्य मूलं वाच्यप्रतीयमानयोः साहित्येनाप्रकाशनम्। उक्तं तेन–

वाच्यप्रत्येययोर्नास्ति व्यङ्ग्यव्यञ्जकतार्थयोः।
तयोः प्रदीपघटवत् साहित्येनाप्रकाशनात्।।[११]

यच्च वाच्यस्य प्रतीयमानेन सह सम्बन्धं प्रतिपादयितुम् अविनाभावनान्तरीयकादयः शब्दाः प्रयुक्तास्तेषां सम्बन्धमात्रमर्थः। स सम्बन्धो नित्यवद् व्याभिचरितोऽपि काव्यानुमाने भवितुमर्हति। अविनाभावशब्दस्य सम्बन्धमात्रमर्थः **अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते** इत्यस्य व्याख्याने मम्मटेनापि स्वीकृतः। यच्च महिमभट्टेन वाच्यप्रतीयमानयोर्दृष्टान्तत्वेन धूमानलावुक्तौ तेन धूमस्यानलेनेव वाच्यस्य प्रतीयमानेन सम्बन्धस्य नित्यता साधयितुं न शक्यते, दृष्टान्तस्य साम्यमात्रप्रदर्शनपरत्वाद् भेदाच्च। दृष्टान्तदार्ष्टान्तिकयोरिह हि प्रतीतिक्रमवत्त्वेन सम्बद्धत्वमात्रत्वेन च साम्यम्। एवं महिमभट्टस्य काव्यानुमानं हेत्वाभासाश्रितं जानतोऽपि मम्मटेन हेतोराभासमानत्वेनैव तस्य खण्डनं प्रमाद एव स्यात्। अत इदं स्वीकरणीयं यन्मम्मटस्तार्किकाणाम् एवाऽनुमानं काव्ये हेतोराभासमानत्वेन निराकृत्य तस्याऽसम्भवं प्रदर्शयति। यथा ध्वन्यालोके ध्वनिकृता नैयायिकानाम् अनुमानस्यासम्भवो हेतोराभासमानत्वेनोक्तस्तथा ध्वनिसिद्धान्तसङ्ग्रहं काव्यप्रकाशे कुर्वता मम्मटेनापीति मन्ये। इदं विवेकस्य **शब्दस्य शब्दव्यङ्ग्यं प्रति लिङ्गत्वं ध्वनिकृतैवाऽऽशङ्क्य निराकृतमित्यभिप्रेत्य वाच्यस्यार्थस्य व्यङ्ग्यं प्रति यद् व्यञ्जकत्वं तल्लिङ्गत्वमेवेत्याशङ्कते**''[१३] इति वचनेनापि स्पष्टम्। यदि मम्मटेन महिममतस्य खण्डनमभिप्रेतं स्यात् तदा स काव्यप्रकाशे वाच्यव्यङ्ग्ययोः सहभावेनैव प्रतीतिः साधनीया व्यङ्ग्ये व्यञ्जकोपरागो वाच्यश्च, यथा पश्चाद् **व्यञ्जकप्रतीतिकाले हि नियमेन व्यङ्ग्यप्रतीतिरिति नास्माकमाशयः। व्यङ्ग्यप्रतीतिकाले तु नियमेन व्यञ्जकप्रतीतिर्भवत्येवेत्याशयेनाक्रमत्वं व्यक्तिश्च समर्थिता। तथा चोक्तम्- न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति वाच्याविनाभावेन तस्य प्रकाशनादित्यादि। न तु विपर्ययेणोक्तम्- नहि वाच्ये प्रतीयमाने व्यङ्ग्यबुद्धिर्दूरीभवतीति। निमित्तनिमित्तिभावस्तु नाङ्गीकृतोऽस्माभिः। केवलं सोऽन्यादृशो गम्यगमकभावप्रयोजको यत्र गम्यस्य गमकोपरागो न प्रतीयते। अन्यादृशश्च व्यङ्ग्यव्यञ्जकभावप्रयोजको यत्र प्रत्याय्यस्य प्रत्यायकरागप्रतिपत्तिः। तेन नास्ति रसादीनां व्यङ्ग्यत्वे विप्रतिपत्तिः।**''[१४] इति रुय्यकेणोक्तम्। किन्तु मम्मटेन तथा न कृतमिति स्पष्टं यदनेन महिमकाव्यानुमानं न खण्ड्यते, अपितु नैयायिकानामेवानुमानम्। नैयायिकैरपि व्यञ्जना स्वीकार्येति वाग्देवतावतारस्य हृदयम्। अतो या बालचित्तानुरञ्जिनी-साहित्यचूडामणि-सम्प्रदायप्रकाशिनी-काव्यप्रदीप-सुधासागर-बालबोधिनीप्रभृतयो व्याख्याः काव्यप्रकाशस्थानुमानखण्डनं महिमभट्टकाव्यानुमानस्य खण्डनं वदन्ति तेषां भ्रम एवेति मन्ये। इह युक्ताऽयुक्तत्वे विद्वांस एव प्रमाणानि। तदेवमस्य विचारस्य निष्कर्षः-

काव्यप्रकाश उल्लासे पञ्चमे मम्मटेन यत्।
अनुमानं निरस्तं तत् तार्किकाणां मते मतम्।।

महिम्नोऽनुमितेरेतत् खण्डनं याः प्रचक्षते।
व्याख्यास्तासां भ्रमो ज्ञेय इत्येतन्मम सम्मतिः।।

महिम्नोऽनुमितिर्हेत्वाभासादपि हि जायते।
हेत्वाभासादतस्तस्याः खण्डनं नैव युज्यते।।

महिम्नोऽनुमितिः पूर्वपक्षश्चेत् सम्मतो भवेत्।
वाच्यव्यङ्ग्यप्रतीत्योः स्यात्सहभावस्तदोदितः।।

पादटिप्पणी

१. काव्यप्रकाशः- (तृतीयभागः, नागप्रकाशकः, १९९८ ई.) १३९५-१४०९ पृ.
२. तत्रैव, १३९५-१३१९ पृ.
३. व्याक्तिविवेकः ८१ पृ.
४. तत्रैव ११२ पृ.
५. काव्यप्रकाशः, बालबोधिन्याम्-२५४ पृ.
६. रसगङ्गाधरः, प्रथमानने-१६ पृ.
७. व्यक्तिविवेकः ७६–७८ पृ.
८. ध्वन्यालोकः, तृतीयोद्योतः, ४८९ पृ.
९. तत्रैव
१०. हिन्दीव्यक्तिविवेकः-५१०-७११ पृ.
११. हिन्दीव्याक्तिविवेकः (प्रो. रेवाप्रसादद्विवेदी, चौखम्भा सं.सं. वाराणसी, तृतीय सं., वारणसी, ११२ पृ.)
१२. तत्रैव काव्यप्रकाशे १३९८ पृ.
१३. हिन्दीव्यक्तिविवेकः, व्याख्याने-६३ पृ.